**8 किं ··· °कदेशेनेति** ] Cf. *Nyāyavārttika* ad 2.2.64, 304.20–21: यद्यनेकार्थवृत्ति गोत्वं तत् किं प्रतिपिण्डं परिसमाप्त्या वर्तते, अथैकदेशेनेति।

---

**2 अतश्चैवम्** ] MV$K_1$; अतश्चेदग्रेतः -- भावात् यद्धि यतो व्यतिरिक्तं तत्तस्मिन्नगृह्यमाणे पि गृह्यते वजादिपटो न चैवं जातिव्यक्ती इति न तयोर्भेदः अतश्चैवं $A_1$; अतश्चेह ग्रते -- भावात् यद्धि यतो व्यतिरिक्तं तत्तस्मिन्नगृह्यमाणे पि गृह्यते वजादिपटो न चैवं जातिव्यक्ती इति न तयोर्भेदः अतश्चैवं $O_1$  **2 तदग्रहे** ] MV$K_1O_1$; भेदग्रहे $A_1$  **3 पटः** ] MV$K_1$; पटे $A_1O_1$  **4 जातिरु°** ] V$A_1K_1O_1$; जातिरू° M  **7 तद्वृत्ति°** ] MV$A_1O_1$; तद्वृत्त° $K_1$  **8 °पपत्तेः** ] MV$K_1$; °पपत्ते $A_1O_1$  **8 किं** ] MV$A_1O_1$; om. $K_1$  **8 द्वयं** ] $K_1$; द्वयमपि MV$A_1O_1$

पिण्डे सामान्यमेकत्र यदि कार्त्स्न्येन वर्तते।
तत्रैवास्य समाप्तत्वान्न स्यात् पिण्डान्तरे ग्रहः॥
एकदेशेन वृत्तौ तु गोत्वजातिर्न कुत्रचित्।
समग्रास्तीति गोबुद्धिः प्रतिपिण्डं कथं भवेत्॥

जातेश्च निरवयवत्वान्न केचिदेकदेशाः सन्ति यैरेषा प्रतिपिण्डं वर्तेत। न चैकत्र पिण्डे समाप्त्या वर्तमाना पिण्डान्तरे ऽपि समाप्त्या वर्तितुमर्हति, समाप्तस्य पुनरुत्पत्तिं विना समाप्त्यन्तरानुपपत्तेः। तथाभूतस्य च वृत्तिप्रकारस्य क्वचिददर्शनात्।

---

**1** पिण्डे ··· ग्रहः ] quoted in *Ślokavārttika* 300.20–21 (पदार्थत्वम् न for समाप्तत्वान्न); cf. *Nyāyavārttika* ad 2.2.64, 304.21–22: यदि प्रतिपिण्डं परिसमाप्त्या वर्तते, पिण्डवदसाधारणत्वान्न सामान्यं भवितुमर्हति।

**3** एकदेशेन ··· भवेत् ] quoted in *Śṛṅgāraprakāśa* 300.22–23; cf. *Nyāyavārttika* ad 2.2.64, 304.22–305.2: अथैकदेशेन वर्तते, तथापि नैकमनेकत्र वर्तते, किं त्वनेकमनेकत्रेति। यस्मात् प्रदेशाः सामान्यस्य वर्तन्त इति। ये च त एकदेशाः सामान्यस्य प्रत्येकं पिण्डेषु वर्तन्ते ते किं सामान्यात्मका उत नेति।

**5** जातेश्च ··· क्वचिददर्शनात् ] Cf. *Śṛṅgāraprakāśa* 300.24–301.1: न चास्य निरवयवत्वादेकदेशा विद्यन्ते। न चैकपिण्डे समाप्त्या वर्तमाना पिण्डान्तरे ऽपि समाप्त्यैव वर्तितुमर्हति। समाप्तस्य न पुनरुत्पत्तिं विना समाप्त्यन्तरानुपपत्तेः। न च तथाभूता काचिद्वृत्तिरुपलभ्यते।

**8** तथाभूतस्य ··· °दर्शनात् ] *Nyāyamañjarī*, Kataoka [2010:90.8]: क्वेदमन्यत्र दृष्टं चेद् अहो निपुणता तव।

---

**1** °मेकत्र ] $MA_1K_1O_1$; °मन्यत्र $M^{kha}V$ **1** कार्त्स्न्येन ] $MVK_1$; कार्त्स्न्ये $A_1O_1$ (unmetrical) **2** तत्रै° ] $MVA_1O_1$; तस्यै° $K_1$ **2** °वास्य ] $MVK_1$; °वाष्य $M^{gha}$; °वाप्य $A_1O_1$ **2** समाप्त° ] $MVK_1O_1$; समाप्तस्य° $A_1$ **2** °त्वान्न ] $MVA_1^{pc}K_1O_1$; °त्वान्न केचिदेकदेशाः $A_1^{ac}$ **3** गोत्व° ] $MVK_1$; गोत्र° $A_1O_1$ **5** °देकदेशाः ] $VA_1K_1O_1$; °देकशाः M **6** वर्तेत ] $MK_1$; वर्तते $VA_1O_1$ **6** पिण्डे ] $MVK_1$; पिंडो $A_1O_1$ **6** समाप्त्या ] $A_1K_1O_1$; समाप्य MV **6** ऽपि ] $K_1$; om. $MVA_1O_1$ **6** समाप्त्या ] $K_1$; समाप्यैव M; समाप्त्यैव $M^{gha}VA_1O_1$ **7** °त्पत्तिं ] $MVA_1O_1$; °त्पत्तिः $K_1$ **8** क्वचिद° ] $K_1$; क्वचिदप्य° $MVA_1O_1^{pc}$; क्वचिप्य° $O_1^{ac}$

## [4.2 वैशेषिकमतविचारः]

### [4.2.1 समवायः]

या च समवायात्मिका पिण्डेषु सामान्यस्य वृत्तिरौलूक्यैरुच्यते, तामपि न बुद्ध्यामहे वयम्। “अयुतसिद्धानामाधार्याधारभूतानां यः संबन्ध इहप्रत्ययहेतुः स समवायः” इति यदुच्यते, तद्विप्रतिषिद्धम्। अयुतसिद्धता च संबन्धश्चेति कथं संगच्छेत। पृथक्सिद्धे हि वस्तुनी कुण्डबदरवद् अन्योन्यं संबध्येते स्त्रीपुंसवद्वा। अयुतसिद्धत्वे तु तदेकत्वात्किं केन संबध्यते। न ह्यहं मयैव संबध्ये।

### [4.2.2 द्रव्यगुणसंबन्धः]

द्रव्यगुणयोरपृथक्सिद्धयोरपि संबन्धो विद्यत इति चेत्। तदिदमुन्मत्तस्योन्मत्तसंवर्णनम्, गुणिनो ऽपि गुणव्यतिरिक्तस्यानुपलम्भात्।

---

**4 अयुतसिद्धाना° ··· स समवायः** ] *Padārthadharmasaṃgraha* 2.12–13 (§9)
**6 अयुतसिद्धता ··· संबध्यते** ] *Nyāyamañjarī*, Kataoka [2010:91.5–6]: नन्वयुतसिद्धयोः संबन्धः समवायः। स च भेदप्रतिषेधादेव निरस्तः। न शक्यते निरसितुम्।
**10 द्रव्यगुण° ··· विद्यत इति चेत्** ] *Nyāyamañjarī*, Kataoka [2010:91.9]: अवयवावयविनोर्गुणगुणिनोश्चेयमेव वृत्तिः।
**11 °मुन्मत्तस्योन्मत्तसंवर्णनम्** ] *Nyāyamañjarīgranthibhaṅga* 130.3–4: यथा उन्मत्त उन्मत्तान्तरं श्लाघत एवमलब्धवृत्ति सामान्यं तथाविधमेवालब्धवृत्ति द्रव्यं प्रदर्शयतीति।

---

**3 सामान्यस्य वृत्तिरौ°** ] $K_1$; वृत्तिः सामान्यस्यौ° $MVA_1O_1$ **4 °नामाधार्या°** ] $MA_1K_1O_1$; °मा° $M^{kha}$(sic) ; °नामा° V **5 स** ] M; om. $VA_1K_1O_1$ **6 संगच्छेत** ] $MK_1O_1$; सङ्गच्छते V; संगछेत् $A_1$ **7 °बदर°** ] $MVK_1$; °बधर° $A_1O_1$ **7 संबध्येते** ] $VK_1$; संबन्ध्येते M; संबध्यते $A_1O_1$ **7 °सिद्धत्वे** ] $MA_1K_1O_1$; °सिद्धे $M^{ka}V$ **8 तु** ] $MVK_1$; om. $A_1O_1$ **8 केन** ] MV; किंन $A_1O_1$; के+ $K_1$ **8 संबध्यते। न ह्यहं मयैव संबध्ये** ] em.; संबध्येत। न ह्यहं मयैव संबध्ये $MA_1O_1$; संबध्येते $M^{kha}$(sic) ; संबध्यते V; +बध्यते न ह्यहम् मयैव संबध्ये $K_1$ **10 °थक्सिद्धयोरपि** ] $MVK_1O_1^{pc}$; °थविज्ञद्धयोरपि $A_1$; °थक्सिद्धयोरपृथ पि $O_1^{ac}$ **10 विद्यत इति** ] $A_1K_1O_1$; विद्यत एवेति MV **11 °मुन्मत्तस्यो°** ] $MA_1K_1O_1$; °मन्यत्तस्यो° V

अयं गुणी रूपादिभ्यो ऽर्थान्तरत्वेन नात्मानमुपदर्शयति व्यतिरेकं च तेभ्यो वाञ्छतीति चित्रम्।

[4.2.3 अयुतसिद्धत्वम्]

यदपि नित्यानित्यविभागेन युतसिद्धेः स्वशास्त्रे परिभाषणं कृतम्—नित्यानां परमाणूनां पृथग्गतिमत्त्वं युतसिद्धिः। अनित्यानां तु युताश्रयसमवायित्वम्। विभूनां तु परस्परमाकाशादीनां संबन्ध एव नास्तीति—तदपि प्रक्रियामात्रम्। नानात्वेन सिद्धिर्निष्पत्तिर्ज्ञप्तिर्वा युतसिद्धिरुच्यते। तद्विपर्ययादयुतसिद्धिरैक्येन सिद्धिरवतिष्ठते। तथा च संबन्धो दुर्वचः।

---

**5** नित्यानां … एव नास्तीति ] *Padārthadharmasaṃgraha* 30.10–13 (§179–180): विभूनां तु परस्परतः संयोगो नास्ति, युतसिद्ध्यभावात्। सा पुनर्द्वयोरन्यतरस्य वा पृथग्गतिमत्त्वं पृथगाश्रयाश्रयित्वं (पृथगाश्रयाश्रयित्वं ] ed.; युताश्रयसमवायित्वं L. Vy.) चेति।; cf. also *Padārthadharmasaṃgraha* 32.15–33.7 (§191–192): सा पुनर्द्वयोरन्यतरस्य वा पृथग्गतिमत्त्वमियं तु नित्यानाम्। अनित्यानां तु युतेष्वाश्रयेषु समवायो युतसिद्धिरिति। … दिगादीनां तु पृथग्गतिमत्त्वाभावादिति परस्परेण संयोगविभागाभाव इति।
**5** अनित्यानां तु ] *Nyāyamañjarīgranthibhaṅga* 130.5–6: अनित्यानां त्विति। तन्तुपटादीनां युतेषु भिन्नेष्वाश्रयेषु समवायित्वं तन्तूनामंशुषु समवायात् पटस्य तन्तुष्विति।
**6** विभूनां तु … प्रक्रियामात्रम् ] *Nyāyamañjarī*, Kataoka [2010:93.2]: विभूनामपि संबन्धः परस्परमसंभवादेव नेष्यते, न परिभाषणात्।; *Nyāyamañjarīgranthibhaṅga* 130.6–7: विभूनां तु परस्परमाकाशादीनामिति। पृथग्गतिमत्त्वयुताश्रयसमवायित्वयोरभावात्।

---

**1** °त्वेन नात्मान° ] $MVA_1^{pc}K_1O_1$; °त्वेनात्मानात्मान° $A_1^{ac}$ **1** °मुपदर्शयति ] MV; °मुद्दर्शयति $A_1O_1$; +++शयति $K_1$ **2** वाञ्छतीति ] $MA_1K_1O_1$; वाङ्छन्तीति V **4** युत° ] $MVA_1K_1O_1$; अयुत $M^{gha}$ **6** युताश्रय° ] $MK_1$; युताश्रयि° $M^{kha}VA_1O_1$ **6** विभूनां तु ] $K_1$; विभूनां $MVA_1O_1$ **7** सिद्धिर्निं° ] $MVA_1^{pc}K_1O_1$; सिद्धिष्पर्निं° $A_1^{ac}$ **8** °रुच्यते ] $M^{gha}A_1K_1O_1$; °रित्युच्यते MV **9** तथा च ] $K_1$; तथा च सति $MVA_1O_1$

## [4.2.4 अवयवावयविनोर्संबन्धः]

अवयवावयविनोरपि समवायात्मा संबन्ध एवमेव परिहर्तव्यः। यथाह भट्टः—

नानिष्पन्नस्य संबन्धो निष्पत्तौ युतसिद्धता॥ इति॥

परमाण्वाकाशयोः परमाणुकालयोश्च संबन्ध इष्यते नाकाशकालयोरन्योन्यमिति प्रक्रियैवेत्यलमवान्तरचिन्तनेन। तस्मान्न जातिव्यक्त्योः काचिद्वृत्तिरुपपद्यते।

---

**4 नानिष्पन्नस्य ··· युतसिद्धता]** *Ślokavārttika pratyakṣa* 146cd (Taber [2005:157]); quoted in *Nyāyamañjarī*, Kataoka [2010:92.5]; *Nyāyamañjarī-granthibhaṅga* 130.7–8: नानिष्पन्नस्य सम्बन्ध इत्यस्य पूर्वमर्धम्—'न चाप्ययुतसिद्धानां सम्बन्धित्वेन कल्पना' (146ab) इति।

---

**2 समवाया°]** $MVK_1$; सुमवाया° $A_1O_1$ **2 परिहर्तव्यः]** MV; परिहंतव्यः $A_1O_1$; ++हर्तव्यः $K_1$ **3 यथाह]** $MVA_1K_1$; यथाह भट्टः नानिष्पन्नस्य संबंधो निष्पत्तौ युतसिद्धतेति यथा $O_1$ **4 °सिद्धता॥ इति]** $MVA_1^{pc}O_1$; °सिद्धेतेति $A_1^{ac}$; °सिद्धितेति $K_1$ **6 °कालयोर°]** $MVK_1$; °कालयोरित्य° $A_1O_1$ **6 °क्रियैवे°]** $VK_1$; °क्रियैवेयमि° $MA_1O_1$; °क्रियै° $M^{kha}$(sic) **6 °त्यलम°]** $MVK_1$; °ति किम° $M^{ka}A_1O_1$ **6 °वान्तर°]** $MVK_1$; °वांततेन $A_1$; °वांतरेण $O_1$ **6 चिन्तनेन]** $MVK_1$; om. $A_1$; विततेन $O_1$ **7 काचि°]** $MVA_1O_1$; क्वचि° $K_1$

## [4.3 प्राभाकरमतविचारः]

सुशिक्षितास्तु रूपरूपिलक्षणमाचक्षते जातिव्यक्तियोः संबन्धम्। सोऽपि नोपपद्यते। रूपशब्दः शुक्लादिगुणवचन आकारवचनः स्वभाववचनो वा। शुक्लादिवचनत्वे नीरूपाणां पवनमनःप्रभृतीनां द्रव्याणां गुणकर्मणां च सामान्यशून्यता स्यात्। आकारवचनत्वे ऽप्यवय-

---

**2 सुशिक्षितास्तु ··· संबन्धम्** ] *Bṛhatī* ad 1.3.32, 155.6–9 (*pūrvapakṣa*): संबन्धितया ह्यनवगम्यमानं सामान्यं सामान्यमिति नावगम्यते। संबन्ध्यन्तरसापेक्षा हि संबन्धिनि बुद्धिर्भवति। विशेषतश्चात्र रूपरूपितया नावगम्यते। न हि रूपिशून्या रूपबुद्धिरस्ति। यदि स्यात् रूपतैव न स्यात्।; cf. *Ṛjuvimalā* 155.18–19: सामान्यं हि रूपं तेन व्यक्तेः रूप्यमाणत्वाद्रूपिणी व्यक्तिः।; *Nyāyamañjarīgranthibhaṅga* 130.9–16: सुशिक्षितास्त्विवति प्राभाकराः। ते हि सामान्याकारं रूपं पदार्थस्याहुः। न च रूपं रूपिशून्यमुपलभ्यते। पदार्थान्तराणां हि स्वरूपेण लब्धात्मलाभानामवगतानां च परस्परसम्बन्धचिन्ता क्रियमाणोपपद्यते, रूपस्य त्वाकृष्टरूपिप्रतिपत्तेरेव प्रतिपत्तिरिति अन्य एव सम्बन्धान्तरविलक्षणो ऽयं सम्बन्ध इति काऽनयोः सम्बन्धं प्रति विमतिः "कथं वृत्तिः" इत्यादिकेति। तथा चाहुः—'सम्बन्धितया ह्यनवगम्यमानं सामान्यं सामान्यम् इति नावगम्यते। सम्बन्ध्यन्तरसव्यपेक्षा हि सम्बन्ध्यन्तरबुद्धिः। विशेषतश्चात्र रूपतया सम्बन्धिताऽवगम्यते। न च रूपिशून्या रूपबुद्धिरस्ति। रूपतैव तदा न स्यात्' इति।
**2 रूपरूपिलक्षण° ··· नोपपद्यते** ] Cf. *Śṛṅgāraprakāśa* 301.4–5: नापि रूपरूपिलक्षणस्सम्बन्धो भविष्यतीति वक्तव्यम्, रूपार्थस्य निरूपयितुमशक्यत्वात्।
**3 रूपशब्दः ··· एव भवेत्** ] Cf. *Śṛṅgāraprakāśa* 301.5–8: किमयं रूपशब्दश्शुक्लादिगुणवचनः स्वभाववचनो वा। शुक्लादिवचनत्वे (नी)रूपाणां पवनमनःप्रभृतीनां द्रव्याणां सामान्यशून्यता स्यात्। आकारवचनत्वे ऽप्यवयवसन्निवेशरहितानां तेषामेव सामान्यवत्ता न प्राप्नोति। स्वभाववचनत्वे तु जातिजातिमतोरव्यतिरेक एव भवेत्।

---

**2 सुशिक्षितास्तु ··· शुक्लादिवचनत्वे** ] MVK$_1$O$_1$ ; सुशिक्षितास्तु दिवानत्वे A$_1$
**2 रूप°** ] MVK$_1$ ; क्रम° O$_1$ **3 रूपशब्दः** ] MVO$_1$ ; रूपश्शब्दः K$_1$ **3 शुक्लादिगुणवचन** ] K$_1$ ; किं शुक्लादिवचन MV ; शुक्लादिवचन O$_1$ **4 °प्रभृती°** ] MVA$_1$O$_1$ ; +++ K$_1$ **5 आकार°** ] MVK$_1$ ; आकाश° A$_1$O$_1$

वसन्निवेशरहितानां तेषामेव गुणादीनां सामान्यवत्ता न प्राप्नोति। स्वभाववचनत्वे तु जातिजातिमतोरव्यतिरेक एव भवेत्।

अवभाति हि भेदेन स्वभावो न स्वभाविनः।
शब्दातिरिक्ततैवेयं न तु वस्त्वतिरिक्तता॥

किं चेदं रूपं नाम—किं वस्त्वेव वस्तुधर्मो वा वस्त्वन्तरं वा। वस्त्वन्तरं तावन्न प्रतिभातीत्युक्तम्। वस्तुधर्मोऽपि तद्व्यतिरिक्ततया स्थितो न चकास्त्येव। अव्यतिरेके तु तस्य संबन्धवाचोयुक्तिरनुपपन्नेत्युक्तम्।

न च रूपरूपित्वलक्षणः संबन्धः संयोगसमवायव्यतिरिक्तः कोऽपि श्रोत्रियैरपि विविच्य व्याख्यातुं शक्यते—एष ईदृगिति। तस्माद् वाचोयुक्तिनूतनतामात्रमिदं कृतम्, न त्वर्थः कश्चिदुत्प्रेक्ष्यत इत्यलं प्रसङ्गेन।

---

**3** अवभाति ··· वस्त्वतिरिक्तता ] quoted in *Śṛṅgāraprakāśa* 301.9–10.
**6** °त्युक्तम् ] See the verse in section 4.3.
**8** °त्युक्तम् ] See section 4.2.1.

---

**1** °सन्निवेश° ] MV$K_1$; °सन्निवेशन° $A_1O_1$ **1** °वत्ता ] MV$K_1$; °वत्तां $M^{gha}$; °वतां $A_1$; °वर्ता $O_1$ **1** प्राप्नोति ] MV$A_1O_1$; प्राप्नोतीति $K_1$ **2** जातिजाति° ] MV$O_1$; जाति° $A_1$; विजातिजाति° $K_1$ **2** भवेत् ] MV$A_1O_1$; ++त् $K_1$ **3** न ] MV$K_1$; हि $M^{gha}A_1O_1$ **4** °क्ततैवेयं न ] MV$A_1O_1$; °क्तैरेव यन्न $K_1$ **5** वस्त्वेव ] MV$A_1^{pc}K_1O_1$; वस्त्विव $A_1^{ac}$ **5** वस्तुधर्मो वा ] $A_1K_1O_1$; वस्तुधर्मो MV **5** वस्त्वन्तरं वा ] MV$K_1O_1$; वस्तुंतरं वा $A_1$ **6** °भातीत्युक्तम् ] MV$A_1^{pc}K_1O_1$; °भावो हि स्वभाविनो तीत्युक्तं $A_1^{ac}$ **6** तद्व्यतिरिक्ततया ] V$A_1O_1$; तद्व्यतिरिक्तया M; तद्वतिरिक्ततया $K_1$ **7** स्थितो ] MV; स्थितौ $M^{gha}A_1O_1$; ++ $K_1$ **7** न ] MV$K_1$; ना $A_1O_1$ **7** तु तस्य ] em.; च MV; पि च $A_1O_1$; तु तरु $K_1$ **9** °लक्षणः ] M$A_1K_1O_1$; °लक्षण° V **10** श्रोत्रियैरपि विविच्य ] $K_1$; श्रोत्रियैर्विविच्य MV; श्रोत्रियो च्य $A_1$; श्रोत्रियो विविच्य $O_1$ **10** व्याख्यातुं ] MV; च्याख्यायितुं $A_1$; व्यातुं $K_1$; व्याख्यायितुं $O_1$ **10** एष ईदृगिति ] $K_1$; यथेदृगिति MV$A_1O_1$ **11** °नूतनता° ] MV$A_1O_1^{pc}$; °नू++ता° $K_1$; °नूतनाता° $O_1^{ac}$ **11** °मिदं ] $M^{gha}A_1K_1O_1$; °मिह MV

### [4.4 सर्वगतत्वविचारः]

अपि चेयं जातिः—

सर्वसर्वगता वा स्यात्पिण्डसर्वगतापि वा।

### [4.4.1 सर्वसर्वगतत्वनिरासः]

सर्वसर्वगतत्वे स्यात्कर्कादावपि गोमतिः॥
अश्वधीः शाबलेयादावुष्ट्रबुद्धिर्गजादिषु।
पदार्थसंकरश्चैवमत्यन्ताय प्रसज्यते॥
अथाभिव्यक्तिसामर्थ्यनियमान्नैष संकरः।
न हि कर्कादिपिण्डानां गोत्वादिव्यक्तिकौशलम्॥
मैवं खण्डाद्यभिव्यक्तमपि गोत्वमनंशकम्।
सर्वत्रैव प्रतीयेत न वा सर्वगतं भवेत्॥
तद्देशग्रहणे तस्य न हि किंचिन्नियामकम्।
दीपवद्व्यञ्जकः पिण्डो न तु तत्पिण्डवृत्ति तत्॥
सर्वत्रागृह्यमाणं च सर्वत्रास्तीति को नयः।
सर्वसर्वगतं तस्मान्न गोत्वमुपपद्यते॥

---

**3 सर्वसर्वगता ··· व्यसनसन्ततिः ]** All nine verses are quoted in *Śṛṅgāraprakāśa* 301.9–302.4 with minor variants.

**3 सर्वसर्वगता ··· °गतापि वा ]** *Nyāyavārttika* ad 2.2.64, 302.21–303.1: **केन सर्वगतत्वं जातेरभ्युपगम्यते, अपि तु स्वविषये सर्वत्र वर्तत इति सर्वगतेत्युच्यते।**; *Nyāyamañjarī*, Kataoka [2010:94.3]: **यदपि सर्वसर्वगतत्वं पिण्डसर्वगतत्वं च विकल्प्य दूषितम्।**

---

**2 जातिः ]** MVK$_1$ ; **मतिः** A$_1$O$_1$ **5 °त्कर्कादा° ]** MVK$_1$ ; **°त्ककादा°** A$_1$O$_1$ **6 अश्व° ]** MVK$_1$ ; **स्वश्व°** A$_1$O$_1$ **6 °वुष्ट्रबुद्धि° ]** MVK$_1$O$_1$ ; **°वुष्टुद्धि°** A$_1$ **8 °भिव्यक्ति° ]** K$_1$ ; **°पि व्यक्ति°** MVA$_1$O$_1$ **9 गोत्वादि° ]** MVK$_1$ ; **नाशंक्यं** M$^{gha}$A$_1$O$_1$ **10 खण्डाद्यभि° ]** MVA$_1$O$_1$ ; **खण्डाभि°** K$_1$(unmetrical) **13 तत् ]** MVK$_1$ ; **°कः** M$^{ka}$A$_1$O$_1$ **14 सर्वत्रागृ° ]** MA$_1$K$_1$O$_1$ ; **सर्वत्र गृ°** V **14 को नयः ]** MA$_1$K$_1$O$_1$ ; **मे ऽन्वयः** M$^{kha}$V **15 सर्वसर्वगतं ]** MVK$_1$O$_1$ ; **सर्वगतं** A$_1$ **15 गोत्व° ]** MVK$_1$ ; **गोत्र°** A$_1$O$_1$

### [4.4.2 पिण्डसर्वगतत्वनिरासः]

पिण्डसर्वगतत्वे तु काममेतददूषणम्।
किं तु नैवाद्य जातायां गवि गोप्रत्ययो भवेत्॥
पिण्डे नासीदसंजाते जातिर्जाते च विद्यते।
संक्रामति न चान्यस्मात् पिण्डादन्यत्र निष्क्रिया॥
आयात्यपि न तं पिण्डमपोज्झति पुरातनम्।
न चांशैर्वर्तते चेति कष्टा व्यसनसन्ततिः॥

### [4.5 भट्टमतविचारः]

### [4.5.1 भट्टमतोपन्यासः]

भट्टस्तु ब्रूते। भिन्नाभिन्नमेकं वस्त्वनुगामि च व्यावृत्तं च। यत्तस्यानुगामि रूपं तत्सामान्यम्, यद् व्यावृत्तं स विशेषः। तथा हि—

सर्ववस्तुषु बुद्धिश्च व्यावृत्त्यनुगमात्मिका।
जायते, द्व्यात्मकत्वेन विना सा च न सिध्यति॥ इति।

केवलविशेषात्मकपदार्थपक्षे सामान्यप्रतीतेरनालम्बनत्वम्, सामान्यमात्रवादे च विशेषबुद्धेरनुपपत्तिः।

---

**7 चेति** ] Cf. *Śṛṅgāraprakāśa* 302.4: **न चांशैर्वर्तते चेति केयं व्यसनसन्ततिः**
**12 सर्ववस्तुषु ⋯ सिध्यति** ] *Ślokavārttika ākṛti* 5: **सर्ववस्तुषु बुद्धिश्च व्यावृत्त्यनुगमात्मिका। जायते द्व्यात्मकत्वेन विना सा** (**विना सा** ] $DI_1$; **विनासौ** J) **च न सिध्यति॥**

---

**2 ॰गतत्वे तु** ] $MVK_1$; **॰गतं तत्र** $M^{ka}A_1O_1$ **3 जातायां** ] $MVK_1$; **तायां** $A_1O_1$(unmetrical) **7 चेति** ] $K_1$; **तत्र** $MVA_1O_1$ **7 व्यसन॰** ] $MVK_1$; **व्यसनि॰** $A_1O_1$ **10 भट्टस्तु** ] $K_1$; **भाट्टास्तु** MV; **भाट्टस्तु** $A_1O_1$ **10 ब्रूते** ] $K_1$; **ब्रुवते** $MVA_1O_1$ **10 भिन्नाभिन्न॰** ] $MVK_1$; **भिन्नभिवर्तक॰** $A_1$; **भिन्नाभिवर्तक॰** $O_1$ **10 ॰मेकं ⋯ तथा हि** ] $MA_1K_1O_1$; **॰मेकं** $M^{kha}V$ **10 ॰नुगामि** ] $K_1$; **॰नुयायि** $MA_1O_1$ **11 व्यावृत्तं** ] $MK_1O_1$; **व्यावृत्त** $A_1$ **12 सर्ववस्तुषु बुद्धिश्च** ] $MA_1K_1O_1$; **वस्तुबुद्धिर्हि सर्वत्र** $M^{kha}V$ **13 इति** ] $K_1$; om. $MVA_1O_1$ **15 च** ] $MA_1K_1O_1$; om. V

न चाप्यन्यतरा भ्रान्तिरुपचारेण वेष्यते।
दृढत्वात्सर्वदा बुद्धेर्, भ्रान्तिस्तद्भ्रान्तिवादिनाम्॥

न हि मिहिरमरीचिनिचयनीरप्रतीतिवत् सामान्यप्रत्ययोपमर्देन विशेषप्रतीतिर् विशेषप्रत्ययोपमर्देन वा सामान्यप्रतीतिरुदेति, किं त्वविरोधेनैव युगपदुभयावभासः। अत एव निर्विकल्पकबोधेन द्व्यात्मकस्यापि वस्तुनो ग्रहणमुपेयते।

[4.5.2 भट्टमतनिरासः]

तदेतदभिधीयमानमेव न मनोज्ञमिवाभाति।

---

1 न चाप्यन्यतरा ··· भ्रान्तिवादिनाम् ] *Ślokavārttika ākṛti* 7: न चाप्यन्यतरा भ्रान्तिरुपचारेण वेष्यते (वेष्यते ] $JI_1$; चेष्यते D)।दृढत्वात्सर्वदा बुद्धेर् भ्रान्तिस्तद्भ्रान्तिवादिनाम्॥; *Nyāyamañjarīgranthibhaṅga* 130.17: न चाप्यन्यतरेति।; Sucaritamiśra's *Kāśikā*, Adyar ms. No. 63359, pp. 2551–2552: अतो भ्रान्तिरेकावग्रह औपाधिको वा।एकार्थक्रियाकारित्वादेकजातीयाभिमतेष्वौपनिषदा इवैकत्ववादा इति। तदत्रैकत्वं भ्रान्तमौपचारिकं वा। नानात्वं वा शिलापुत्रकस्य देह इतिवत् कल्पयितुं युक्तम्। द्व्यात्मकत्वाश्रयणं तु विरोधादनुपपन्नमेव। अत आह—न चापीति। यथा तावन्न भ्रान्तिस् तथा दर्शयति—दृढत्वादिति। सर्वदा हि सर्वेषां सर्वत्र द्व्याकारा बुद्धिरुपजायते, सा कथं भ्रान्तिर्भविष्यति। न ह्यसति कारणदोषज्ञाने बाधकप्रत्यये वा भ्रान्तित्वकल्पना युक्ता, सर्वमिथ्यात्वप्रसंगात्।
3 मिहिरमरीचिनिचयनीरप्रतीतिवत् ] Cf. *Nyāyamañjarī* I 447.5–7: प्रवर्तकं हि प्रथममुदकज्ञानमविद्यमाने ऽपि नीरे मिहिरमरीचिषु दृष्टमिति तत्र संशेरते जनाः।; cf. also I 372.8: °मार्तण्डमण्डलमरीचिनिचयचुम्ब्यमान°

---

1 वेष्यते ] $MA_1K_1O_1$; गम्यते $M^{kha}V$ 2 °न्तिस्तद्भ्रा° ] $VA_1K_1O_1$; °न्तिः स्याद् भ्रा° M 3 °निचय° ] $MVA_1O_1$; °निलय° $K_1$ 3 °नीर° ] $MVK_1O_1$; °नीय° $A_1$ 4 विशेष° ] $MVK_1$; विषय° $M^{ka}A_1O_1$ 4 प्रतीति° ] $MVA_1K_1O_1^{pc}$; तीति° $O_1^{ac}$ 4 °मर्देन वा ] $MK_1$; °मर्देन V; °मर्देनैव $A_1O_1$ 5 किं त्व° ] $MVK_1$; किं तु $A_1O_1$ 5 युगपदु° ] $MVK_1O_1^{pc}$; युगपद° $A_1O_1^{ac}$ 5 निर्विकल्पकबोधेन ] $K_1$; निर्विकल्पबोधेन MV; ति----कल्पकबोधेन $A_1$; नि----कल्पकबोधेन $O_1$ 6 °कस्यापि ] $MVK_1$; °कस्या° $A_1O_1$ 8 न ] $MVK_1$; om. $A_1O_1$

नानारूपत्वमेकस्य विरुद्धं वदता स्वयम्।
दूषणाख्यानमौखर्यमस्माकमपवारितम्॥

तदेव सामान्यं स एव विशेषः, तदेवैकं तदेव नाना, तदेव नित्यं तदेवानित्यम्, तदेवास्ति तदेव नास्तीति जैनोच्छिष्टमिदमुच्यते। उच्यमानमपि न शोभते।

दृष्टत्वान्न विरोधश्चेन्न तथा तदवेदनात्।
उक्तं हि नानुवृत्तार्थग्राहिणी नेत्रधीरिति॥

विचित्रविकल्पप्रबन्धविप्रलब्धबुद्धयः खल्वेवं मन्वते भवन्तः। न त्वेकं वस्तु बहुरूपं भवितुमर्हति।

---

**7 उक्तं** ] See section 2.1.
**8 विचित्रविकल्पप्रबन्ध॰** ] *Nyāyamañjarīgranthibhaṅga* 130.20–21: विचित्रविकल्पप्रबन्धेति। निर्विकल्पोत्तरकालं यो ऽयं गौर्गौरित्यादिरबाह्यस्पार्शी विकल्पप्रबन्धः।
**8 ॰विप्रलब्धबुद्धयः ··· भवन्तः** ] *Nyāyamañjarī* II 153.6–7: ध्वन्युपाधिभेदप्रवृत्तवर्णभेदावभासविप्रलब्धबुद्धिं भवद्विधं बोधयितुं पदस्फोट एष निरवयवो ऽस्माभिर्दर्शितः।
**9 न त्वेकं ··· ॰मर्हति** ] *Nyāyamañjarī*, Kataoka [2010:87.7–8]: यदप्यभिहितम् "इतरेतरविरुद्धरूपसमावेश एकत्र वस्तुनि नोपपद्यते" इति।

---

**1 ॰पत्वमेकस्य** ] $K_1$; ॰पत्वमेकस्या॰ $MA_1O_1$; ॰पं त्वयैकस्य $M^{kha}$(sic) ; ॰पं त्वयैकस्या॰ V **1 विरुद्धं** ] $MVK_1O_1$; ॰विरुद्ध $A_1$ **2 ॰ख्यान॰** ] $MK_1$; ॰दान॰ $M^{kha}V$; ॰ख्यानं $A_1O_1$ **2 ॰मौखर्य॰** ] $MVA_1K_1O_1^{pc}$; ॰सौखर्य॰ $O_1^{ac}$ **2 ॰मस्माकमपवारितम्** ] $MVK_1$; ॰मपवारितं $A_1O_1$(unmetrical) **3 स एव** ] $MVA_1O_1$; सत् वि $K_1$ **3 तदेवैकं** ] $MVA_1O_1$; तदैवेकन् $K_1$ **3 तदेव नित्यं** ] $MVK_1$; om. $A_1O_1$(eyeskip) **4 तदेव नास्तीति जैनोच्छिष्ट॰** ] M; नेति चादृष्टष्ट॰ $M^{kha}$(sic) ; तदेव नास्तीति जैनोच्छिन्न॰ $M^{gha}$; नेति चादृष्ट॰ V; तदेव नास्ति इति जैनोङ्घिष्ट॰ $A_1O_1$; तदेव नास्तीति नैमिनोच्छिष्ट॰ $K_1$ **5 ॰मिदमुच्यते। उच्यमानमपि** ] $MVA_1O_1$; ॰मिदमुच्यमानमेव $K_1$ **6 तद॰** ] $MVA_1O_1$; दृद॰ $K_1$ **8 ॰विकल्प॰** ] $MA_1K_1O_1$; ॰कल्पन॰ $M^{kha}$; ॰कल्पना॰ V **8 ॰विप्रलब्ध॰** ] $VA_1K_1O_1$; ॰विप्रलुब्ध॰ M **8 ॰बुद्धयः** ] M $VA_1K_1O_1^{pc}$; ॰बुद्धबुद्धयः $O_1^{ac}$ **8 खल्वेवं मन्वते** ] $K_1$; खल्वेवं मन्यन्ते MV; खल्वेवमन्वति $A_1O_1$ **8 भवन्तः** ] $K_1$; भवन्तु ते MV; भवंते $A_1O_1$

### [4.5.3 सामान्यबुद्धेर्मिथ्यात्वम्]

एकं हि वस्तुनो रूपम्, इतरत्कल्पनामयम्।
नानुवृत्तविकल्पेषु विस्रंभ उचितः सताम्॥
झटित्येवान्यसंस्पर्शनैरपेक्ष्येण दृश्यते।
स्वलक्षणम्, अतो भेदस्तात्त्विको, ऽनुगमो मृषा॥
दृढादृढत्वमक्षुण्णमपरीक्ष्यैव संविदाम्।
द्वयप्रतीतिमात्रेण द्वयाभ्युपगमो भ्रमः॥
न नेति प्रत्ययादेव मिथ्यात्वं केवलं धियाम्।
किं तु युक्तिपरीक्षापि कर्तव्या सूक्ष्मदर्शिभिः॥
न चैकं शबलं वस्तु निर्विकल्पकगोचरः।
व्यक्त्यन्तरानुसन्धानाद्विनानुगमधीः कुतः॥

येष्वनुगतं तत्सामान्यं तेषु बुद्ध्याननुसन्धीयमानेषु तद्वृत्तिसामान्यग्रहणासंभवात्। न चानुसन्धानसामर्थ्यमक्षबुद्धेरस्ति।

---

**4 झटित्येवा° ⋯ मृषा** ] Cf. *Nyāyamañjarī* II 464.19–20 (*brahmādvaitavāda*): **तत्र हि यद् अन्यानपेक्षतया झटिति (झटिति** ] em.; **झगिति** ed.) **पदार्थस्वरूपमवभासते, तत् पारमार्थिकम्, इतरत् काल्पनिकमिति गम्यते।**

---

**2 इतरत्क°** ] $MVK_1$; **इतर क°** $A_1O_1$ **3 नानुवृत्त°** ] $MVK_1$; **नानुवृत्तं** $M^{ka}$ $A_1O_1$ **3 विकल्पेषु** ] $MVK_1O_1$; **कल्पेषु** $A_1$ **4 झटित्येवा°** ] $K_1$; **द्रागितो ह्य°** MV; **जागिन्वे वा°** $A_1$; **जागिन्वे चा°** $O_1$ **4 °र्शनैरपेक्ष्येण** ] MV $K_1$; **°र्शानेनापक्ष्येण** $A_1O_1$ **5 °त्त्विको, ऽनु°** ] $MVK_1$; **°त्त्विकं नु°** $A_1O_1$ **6 दृढादृढ°** ] $MVK_1O_1$; **दृढदृढ°** $A_1$ **6 संविदाम्** ] $MVK_1$; **संविदा** $A_1$; **संविदा⊔** $O_1$ **10 वस्तु** ] $MVA_1O_1$; **स्तु** $K_1$(unmetrical) **11 व्यक्त्यन्त°** ] $MVO_1$; **व्यक्तंत°** $A_1K_1$ **12 तत्सामान्यं तेषु** ] $VA_1K_1O_1$; **तेषु** M **13 चानुसन्धान°** ] $MVK_1$; **चानुमन्वानं** $A_1O_1$ **13 °सामर्थ्यमक्ष°** ] $K_1$; **°सामर्थ्यं** $MVO_1$; **°सामर्थ्य** $A_1$

[4.6 वेदान्तमतनिरासः]

अत एव न ते सम्यगक्षजज्ञानवेदिनः।
अभेदवृत्ति प्रत्यक्षमाहुरद्वैतवाञ्छया॥

[4.7 उपसंहारः]

तस्माद्भेदविषयत्वात्प्रत्यक्षस्य न तद्गम्यं सामान्यम्।

[5 अनुवृत्तबुद्धिसमर्थनम्]

नन्वेवमपह्नूयमाने सामान्ये गौर्गौरिति शाबलेयादिषु यो ऽयमनुवृत्तप्रत्ययः, स कथं समर्थयिष्यते।

[5.1 सामान्येष्वनुवृत्तविकल्पाः]

उक्तमत्र—विकल्पमात्रमेष प्रत्ययः, विकल्पाश्च नार्थाधीनजन्मान इति। तथा च परपरिकल्पितेषु सत्तादिसामान्येष्वपि सामान्यं सा-

---

**2 अत एव ··· °रद्वैतवाञ्छया** ] Cf. *Nyāyamañjarī* II 464.20–465.2: सद्रूपमेव च तत्राभिन्नमन्यनिरपेक्षमवभाति। भेदस्त्वन्यापेक्ष इति नाक्षजविज्ञानविषयतामुपयाति।
**2 अत एव न ते सम्यग°** ] *Nyāyamañjarīgranthibhaṅga* 130.22–25: अत एव न ते सम्यगिति। यथाऽस्तीत्येव वस्तुस्वलक्षणमवभाति पश्चाद् गौरिति विकल्पोदयस्तथा वस्तुग्रहणोत्तरकालमभेदस्य सत्तायाः प्रथा न प्रथमेति। एवं चाभेदवृत्ति सन्मात्रग्राहि प्रत्यक्षम्। सत्तायामगृहीतायां घटादिविकल्पाऽनुदयादिति सत्ताद्वैतवादिनो न सम्यग्वादिनः।
**10 उक्तमत्र** ] See section 2.3.
**11 तथा च ··· इत्यभ्युपगमात्** ] Cf. *Nyāyavārttika* ad 2.2.64, 303.22–304.3: असत्यपि सामान्ये दृष्टः समानप्रत्यय इति चेत्। अथ मन्यसे—यथा सामान्येष्वसति सामान्यान्तरे ऽनुवृत्तिप्रत्ययो दृष्टो गोत्वाश्वत्वघटत्वेषु "इदं सामान्यम्"

---

**2 °गक्षज°** ] $VA_1K_1O_1$ ; °गध्यक्षज° M(unmetrical) ; °गध्यक्ष° $M^{en}$   **3 प्रत्यक्ष°** ] $MVK_1O_1$ ; प्रात्त्यक्ष° $A_1$   **3 °वाञ्छया** ] $MVK_1O_1$ ; °वाञ्छया $A_1$   **5 °माद्भेद°** ] $VA_1K_1O_1$ ; °मात् भेदा° M   **5 तद्गम्यं** ] $MA_1K_1O_1$ ; तद्गतं $M^{kha}V$   **8 °नुवृत्तप्रत्ययः** ] $K_1$ ; °नुवृत्तः प्रत्ययः $MVA_1O_1$   **10 °र्थाधीन°** ] $MVK_1O_1$ ; °र्थाधीनः $A_1$   **11 सामान्यं** ] em. ; सामा+ $K_1$ ; om. $MVA_1O_1$

मान्यमित्यनुवृत्तविकल्पाः प्रवर्तन्त एव। न च सामान्येषु सामान्यान्तराणि सन्ति, “निःसामान्यानि सामान्यानि” इत्यभ्युपगमात्।

### [5.2 एकार्थक्रियाकारित्वमुपाधिः]

औपाधिक एव सामान्येष्वनुगतविकल्प इति चेत्। आयुष्मन्, ग-

---

“इदं सामान्यम्” इति, तस्मादनैकान्तिकत्वादनुवृत्तिप्रत्ययो ऽसाधनमर्थान्तरनिमित्तप्रतिपादन इति। न, अनभ्युपगमात्।; *Ślokavārttika ākṛti* 19: ननु भिन्ने ऽपि सत्तादौ सामान्यमिति जायते। बुद्धिर्विनापि सामान्यादन्यस्मात्, सा कथं भवेत्॥; *Nyāyamañjarī*, Kataoka [2010:99.5–6]: ननु चानुवृत्त (चानुवृत्त° ] $K_1$; चानुवृत्ति° ed.) बुद्धिर्विनापि सामान्यान्तरेण सामान्येषु दृश्यत एवेति को ऽत्र विस्रम्भः।

**2** निःसामान्यानि सामान्यानि ] Source unknown. Quoted in *Tattvasaṅgrahapañjikā* 427.7 and 728.13; *Pramāṇavārttikasvavṛttiṭīkā* 299.22. Cf. *Pramāṇasamuccaya* V 11ab (Pind [2009:A5.4]): उपेत्यापि नैतज्जातेरजातितः (see also Pind [2009:179, n.[64]]). *Pramāṇavārttika* III 156cd (Tosaki [1979:252]): मालाबहुत्वे तच्छब्दः कथं जातेरजातितः॥

**4** औपाधिक ··· इति चेत् ] Cf. *Nyāyavārttika* ad 2.2.64, 304.10–13: अथ मन्यसे गोत्वादिष्वनुवृत्तिप्रत्ययस्य किं निमित्तं यतः सामान्यमिति भवति। कुतश्च सामान्यमिति भवति। अनेकार्थसमवायात् (°समवायात् ] corr.; °समावायात् ed.)। यथा गोत्वमनेकार्थसमवायि, तथाश्वत्वादीत्यनेकार्थैस्तत्समवायस्य समानत्वाद् गोत्वादिष्वनुवृत्तिप्रत्यय इति।; *Ślokavārttika ākṛti* 24 (quoted in *Nyāyamañjarī*, Kataoka [2010:100.6–7]): तस्मादेकस्य भिन्नेषु या वृत्तिस्तन्निबन्धनः। सामान्यशब्दः सत्तादावेकधीकरणेन वा॥; *Nyāyamañjarīgranthibhaṅga* 131.1–2: औपाधिक इति। एकस्यानेकवृत्तित्वादिरुपाधिः, तत्कृतः। यथा गोत्वमेकमनेकवृत्ति च तथाऽश्वत्वाद्यपीति।

---

**1** सामान्यमित्य° ··· निःसामान्या° ] $MA_1K_1O_1$; सामान्या° $M^{kha}V$(eyeskip) **2** सन्ति ] $K_1$; संभवन्ति M; संम्मनंति $A_1$; सम्मनंति $O_1$ **2** °त्यभ्युप° ] M $VK_1$; °ति भ्युप° $A_1O_1$ **4** औपाधिक ] $MVK_1$; औपायिक $A_1O_1$ **4** एव ] $K_1$; एष $MA_1O_1$; एषु $M^{kha}V$

वादिष्वपि कंचिदुपाधिलेषमवलम्ब्य गौर्गौरित्यनुस्यूतविकल्पो भविष्यति। कः पुनरसावुपाधिरिति चेत्। एकार्थक्रियाकारित्वमिति ब्रूमः।

यदेव वाहदोहादि कार्यमेकेन जन्यते।
गोपिण्डेन तदेवान्यैरिति तेष्वनुवृत्तधीः॥

[5.3 कार्यस्याभिन्नत्वमुपचारेण]

ननु प्रतिव्यक्ति कार्यं भिन्नमेव। सत्यम्, भेदबुद्ध्यभावाच्च तदेकमित्युपचर्यते।

कर्कादिकार्यादन्यत्वं यथा ह्येतस्य दृश्यते।
न तथा खण्डकार्यस्य मुण्डकार्याद्विभिन्नता॥

---

**1 गवादिष्वपि ··· भविष्यति** ] Cf. *Nyāyamañjarī*, Kataoka [2010:100.9–101.1]: **नन्विहाप्येकार्थक्रियाकारित्वाद्युपाधिनिबन्धन एकाकारप्रत्ययः सेत्स्यतीत्युक्तम्।**
**2 एकार्थक्रियाकारित्व॰** ] Cf. *Pramāṇavārttikasvavṛtti* 41.9–10: **यथा वा गुडूचीव्यक्त्यादयः सह प्रत्येकं वा ज्वरादिशमनलक्षणमेकं कार्यं कुर्वन्ति। न च तत्र सामान्यमपेक्षन्ते।**
**4 वाहदोहादि** ] Cf. *Pramāṇavārttikasvavṛtti* 89.9–11: **तस्माद्यो ऽस्यात्मानन्यसाधारणो यं पुरस्कृत्य पुरुषो विशिष्टार्थक्रियार्थी प्रवर्तते, यथा गोर्वाहदोहादौ, नान्यसंभविनो ऽर्थस्य, यथा युद्धप्रवेशे।**
**7 ननु ··· भिन्नमेव** ] *Pramāṇavārttikasvavṛtti* 56.12–14: **यदप्युदकाहरणादिकमेकं घटादिकार्यम्, तदपि प्रतिद्रव्यं भेदाद् भिद्यत एवेति नैकं भेदानां कार्यमस्ति।**

---

**1 ॰युष्मन्, गवा॰** ] $MVK_1O_1$; **॰युष्मनावा॰** $A_1$ **1 कंचि॰** ] MV; **केचि॰** $A_1O_1$; **किञ्चि॰** $K_1$ **1 ॰धिलेश॰** ] $M^{ga}VK_1$; **॰धिविशेष॰** M; **॰लेश॰** $A_1O_1$ **1 ॰नुस्यूत॰** ] $MVA_1O_1$; +++ $K_1$ **2 कः** ] $MVK_1$; **यः** $M^{gha}A_1O_1$ **2 ॰रसावुपाधिरिति** ] $MVK_1$; **॰रमायाधिरिति** $A_1O_1$ **5 ॰वान्यैरिति** ] $MVA_1O_1$; **॰वान्येरिति** $K_1$ **7 ॰बुद्ध्यभावाच्च त॰** ] $MA_1O_1$; **॰बुद्धिभयात्त॰** $M^{kha}V$; **॰बुद्ध्यभा+++** $K_1$ **9 ॰दन्यत्वं** ] $MVK_1$; **॰दन्यं** $A_1O_1$(unmetrical) **10 ॰भिन्नता** ] $MVK_1O_1^{pc}$; **॰भिन्नत्वा** $A_1O_1^{ac}$

### [5.4 दर्शनस्याभिन्नत्वम्]

ननु तथा मा भूत्, न त्वभिन्नं खण्डमुण्डयोः कार्यम्। बाढम्। दर्शनमेव तर्हि तयोरेकं कार्यं भविष्यति, तच्चाभिन्नम्।

### [5.5 प्रत्यवमर्शस्याभिन्नत्वम्]

ननु दर्शनमपि प्रतिव्यक्ति भिन्नमेव। सत्यम्, तत्तु स्वपृष्ठभाविप्रत्यवमर्शाख्यकार्यैक्याद् एकमित्युच्यते। यथैव शाबलेयपिण्डदर्शने सति गौरित्यनन्तरमवमर्शः, तथैव बाहुलेयपिण्डदर्शनेऽपि गौरित्येवावमर्श इति तदेकत्वात्तदेकत्वमुच्यते। तदुक्तम्—

एकप्रत्यवमर्शस्य हेतुत्वाद्धीरभेदिनी।
एकधीहेतुभावेन व्यक्तीनामप्यभिन्नता॥ इति॥

तस्मादौपाधिकत्वादनुवृत्तबुद्धेर्न सामान्यं नाम किंचिद्वास्तवमस्तीति।

---

**5 ननु ⋯ °त्युच्यते** ] *Pramāṇavārttikasvavṛtti* 57.1–3: तदपि प्रतिद्रव्यं भिद्यमानमपि प्रकृत्यैकप्रत्यवमर्शस्याभेदावस्कन्दिनो हेतुर्भवद् अभिन्नं ख्याति।
**9 एकप्रत्यवमर्शस्य ⋯ °भिन्नता** ] *Pramāṇavārttika* I 109 (Gnoli ed.); *pāda* ab is quoted in *Nyāyamañjarī*, Kataoka [2010:101.3, 105.4]; *Nyāyamañjarīgranthibhaṅga* 131.3: एकप्रत्यवमर्शेति। धीर्भेदिन्यप्येकावमर्शजननादभेदिन्युच्यत इति।

---

**2 °त्वभिन्नं** ] $K_1$; °त्वभिन्नमेव MV; °त्वभिन्नमेव न $M^{ka}A_1O_1$ **2 बाढम्** ] $MA_1K_1O_1$; om. $M^{kha}V$ **3 °मेव तर्हि** ] $MVA_1O_1$; °मेवं हि $K_1$ **3 कार्यं** ] $VA_1K_1O_1$; om. M **5 °न्नम्। ननु दर्शनमपि** ] $MVA_1O_1$; °न्नानु+++++ $K_1$ **5 तत्तु** ] $VO_1K_1$; om. M; न तु $A_1$ **6 शाबलेय°** ] $A_1K_1O_1$; शाबलेयादि° MV **6 सति** ] $MA_1K_1O_1$; ऽपि $M^{kha}V$ **7 गौरित्य° ⋯ गौरित्येवा°** ] $MA_1K_1O_1$; गौरित्येवा° $M^{kha}V$(eyeskip) **8 तदेकत्वात्तदेकत्वमुच्यते** ] em.; तदेकत्वमुच्यते $MVA_1O_1$; तदेकत्वात्तदेकत्व+++ $K_1$ **11 तस्मादौ°** ] $MVA_1O_1$; तदौ° $K_1$ **11 °बुद्धेर्न** ] $MVK_1$; °बुद्धे न $A_1O_1$ **11 नाम** ] $K_1$; om. $MVA_1O_1$ **11 किंचिद्वास्तव°** ] $MVK_1O_1$; किंचिद° $M^{gha}$(sic) ; किंचिद्वासर° $A_1$

## [6 शब्दानुमानप्रवृत्त्युपपादनम्]

अत्राह—

अनिष्यमाणे सामान्ये ननु शब्दानुमानयोः।
कथं प्रवृत्तिः संबन्धग्रहणाधीनजन्मनोः॥

### [6.1 संबन्धग्रहणासंभवः]

न हि व्यक्तिषु संबन्धो ग्रहीतुमिह शक्यते।
स हि व्यक्तिषु गृह्येत सर्वास्वेकत्र वा क्वचित्॥

न सर्वासु, देशकालादिभेदेन तदानन्त्येनाशक्यत्वात्। एकस्यां व्यभिचारात्। ततो ऽन्यत्रापि स शब्दः प्रवर्तमानो दृश्यते। अगृहीतसंबन्धे च न शब्दलिङ्गे प्रतीतिं जनयितुमुत्सहेते इति।

### [6.2 शब्दानुमानयोर्विकल्पविषये वृत्तिः]

उच्यते। स्यादेतदेवं यदि प्रत्यक्षविषये स्वलक्षणे शब्दलिङ्गयोः वृत्तिः स्यात्।

ननु प्रत्यक्षविषये तयोर्वृत्तावनिष्यमाणायाम् अनवस्थादिदोषो-

---

**8 न सर्वासु ⋯ व्यभिचारात्** ] *Pramāṇasamuccaya* V 2ab (Pind [2009:A1.13–20]): न जातिशब्दो भेदानाम्, आनन्त्याद्, व्यभिचारतः।

---

**2 अत्राह** ] $K_1$; तत्राह $MVA_1O_1$ **6 व्यक्तिषु** ] $MVK_1$; व्यादिषु $A_1O_1$ **6 ग्रहीतुमिह** ] $A_1K_1O_1$; गृहीतुमिह MV **7 व्यक्तिषु** ] $MVA_1K_1O_1$; द्व्यादिषु $M^{gha}$ **8 न** ] $MA_1K_1O_1$; न तु V **8 °नन्त्येना°** ] $K_1$; °नन्त्याद° $MVA_1O_1$ **8 एकस्यां** ] $K_1$; नैकस्याम् $MVA_1O_1$ **9 व्यभिचारात्** ] $MVA_1^{pc}K_1O_1$; व्यक्तिभिचारात् $A_1^{ac}$ **9 ऽन्यत्रापि** ] $MVK_1O_1$; न्यात्रापि $A_1$ **10 प्रतीतिं जनयितु°** ] em.; प्रतीतिमुत्पादयितु° $MA_1O_1$; तत्प्रतीतिमुत्पादयितु° V; प्रतीति जनयितु° $K_1$ **10 °मुत्सहेते इति** ] V; °मुत्सहेते M; °मुत्सहेत $A_1O_1$; °मुत्सहेत इति $K_1$ **12 °विषये** ] $MVK_1$; °विषये न $M^{ka}A_1O_1$ **12 वृत्तिः** ] $K_1$; प्रवृत्तिः $MVA_1O_1$ **14 तयोर्वृ°** ] $MVK_1$; तयोवृ° $A_1$; तयोर्व्व° $O_1$

पघातादप्रवृत्तिरेव स्यात्। मैवं वोचः। कथमसकृदभिहितमपि न बुद्ध्यसे।

विकल्पविषये वृत्तिरिष्टा शब्दानुमानयोः।
अवस्तुविषयाश्चैते विकल्पा इति वर्णितम्॥

## [6.3 अन्यापोहो विकल्पविषयः]

ननु विकल्पानामपि विषयो यद्यनुगामी कश्चिन्नेष्यते, तदुत्सीदत एव शब्दानुमाने। बाढमस्ति विकल्पानामनुस्यूतो विषयः, स तु न

---

**1 अनवस्थादिदोषोपघाता°** ] Cf. *Nyāyamañjarī* I 182.4–12: **ननु संबन्धग्रहणकाले ऽपि सुखसाधनत्वशक्तेरतीन्द्रियत्वात् कथं प्रत्यक्षगम्यता। तज्जातीयत्वाल्लिङ्गादेव तदापि तद्ग्रहण इष्यमाणे ततः पुनः संबन्धग्रहणादनवस्था। सुखादेव कार्यात् तदा तदवगम इति चेत्। तदापि नाज्ञातसंबन्धमवगतिजननसमर्थमिति तत्संबन्धग्रहणवेलायामपि शक्तिग्रहणे प्रत्यक्षस्याक्षमत्वाद् अनुमानान्तरापेक्षायामनवस्था तदवस्था। उच्यते—न खल्वतीन्द्रिया शक्तिरस्माभिरुपगम्यते। यया सह न कार्यस्य संबन्धज्ञानसंभवः॥ स्वरूपसहकारिसन्निधानमेव शक्तिः, सा च सुगमैव।**; I 135.7–12: **अपि चेदमदर्शनाख्यं लिङ्गमविदितव्याप्ति कथमभावस्यानुमापकं भवेत्। व्याप्तिग्रहणं च धूमाग्निवद् उभयधर्मिग्रहणपूर्वकम्। तत्र व्याप्तिग्रहणवेलायामेव तावत् कुतस्त्यमभावाख्यधर्मिग्रहणम् इति चिन्त्यम्। तत एवानुमानादिति यद्युच्यते, तद् इतरेतराश्रयम्। अनुमानान्तरनिबन्धने तु तद्ग्रहणे ऽनवस्था।**; *Śābarabhāṣya* ad 1.1.5c, Frauwallner [1968:46.19–48.1]: **अवश्यमनेन संबन्धं कुर्वता केनचिच्छब्देन कर्तव्यः। येन क्रियेत, तस्य केन कृतः। अथान्येन केनचित्कृतः, तस्य केनेति, तस्य केनेति नैवावतिष्ठते। तस्मादवश्यमनेन संबन्धं कुर्वताकृतसंबन्धाः केचन शब्दा वृद्धव्यवहारसिद्धा अभ्युपगन्तव्याः।**
**4 वर्णितम्** ] See section 2.4.

---

**1 °पघाता°** ] $MVK_1$; **°पपाता°** $A_1$; **°पयाता°** $O_1$ **1 °दप्रवृत्ति°** ] $MVK_1$; **°दवृत्ति°** $A_1O_1$ **3 °विषये** ] $MVK_1$; **°विषयो** $A_1O_1$ **4 अवस्तु°** ] $MVK_1$; **अवलंब°** $A_1O_1$(unmetrical) **4 °श्चैते** ] $MVK_1$; **°श्चैतं** $A_1O_1$ **4 वर्णितम्** ] $MVA_1O_1$; **वर्णितः** $K_1$ **6 विषयो** ] $MVK_1$; om. $A_1O_1$ **7 °दुत्सीदत एव** ] $K_1$; **°दुत्सीदेतामेव** $MVO_1^{pc}$; **°दुत्सदेतामेव** $A_1$; **°दुत्संदेतामेव** $O_1^{ac}$ **7 °नुमाने** ] $MVK_1$; **°नुमानं** $A_1O_1$

वास्तवः। कः पुनरसाविति चेत्। उच्यते।

अतद्रूपपरावृत्तिस्वभावमबहिर्गतम्।
बहिःस्थमिव सामान्यमालम्बन्ते हि निश्चयाः॥
या च भूमिर्विकल्पानां स एव विषयो गिराम्।
अत एव हि शब्दार्थमन्यापोहं प्रचक्षते॥

[6.4 विकल्पस्य वस्त्वसंस्पर्शित्वम्]

तथा हि न विकल्पा वस्तु स्पृशन्ति। कुतः।

एकस्यार्थस्वभावस्य प्रत्यक्षस्य सतः स्वयम्।
को ऽन्यो न दृष्टो भागः स्याद् यः प्रमाणैः परीक्ष्यते॥

तस्माद् भ्रमनिमित्तसमारोपिताकारान्तरनिषेधाय तेषां प्रवृत्तिः। य-

---

**2 अतद्रूपपरावृत्ति°** ] Cf. *Pramāṇaviniścaya* 49.5–6: अतद्रूपपरावृत्तवस्तुमात्रप्रसाधनात्। सामान्यविषयं प्रोक्तं लिङ्गं भेदाप्रतिष्ठितेः॥

**5 प्रचक्षते** ] *Pramāṇasamuccaya* V 11d (Pind [2009:A5.16]): तेनान्यापोहकृच्छ्रुतिः

**7 तथा हि ··· स्पृशन्ति** ] Cf. *Nyāyamañjarī* I 240.6–7: तस्मादतात्त्विकाकारसमुल्लेखपुरःसराः। न यथावस्तु जायन्ते कदाचिदपि कल्पनाः॥

**8 एकस्या° ··· परीक्ष्यते** ] *Pramāṇavārttika* I 43 (Gnoli ed.); also quoted in *Nyāyamañjarī* I 239.12–13 and will be referred back to in *Nyāyamañjarī*, Kataoka [2010:105.8]; *Nyāyamañjarīgranthibhaṅga* 131.4–7: एकस्यार्थस्वभावस्येति। एकस्येति निरंशस्य। को ऽन्यो न दृष्टः। प्रत्यक्षदृष्टात् स्वभावात् को ऽन्यः स्वभावो न दृष्टो यः प्रमाणैर्भवतः प्रमाणतयाऽभिमतैर्विकल्पैरनुमानैश्च परीक्ष्यते। प्रमाणैरिति विकल्पव्यक्त्यनुमानव्यक्त्यपेक्षया बहुवचनम्।; cf. *Pramāṇasamuccaya* I 5: धर्मिणो ऽनेकरूपस्य नेन्द्रियात्सर्वथा गतिः। स्वसंवेद्यं ह्यनिर्देश्यं रूपमिन्द्रियगोचरः॥

**10 तस्माद् भ्रमनिमित्त°** ] *Nyāyamañjarīgranthibhaṅga* 131.8–10: तस्माद् भ्र-

---

**1 वास्तवः** ] $MVK_1O_1$; वास्तुवः $A_1$ **1 उच्यते** ] $MA_1K_1O_1$; om. V **2 °पपरा°** ] $MVA_1O_1$; °परा° $K_1$(unmetrical) **3 °लम्बन्ते** ] $MK_1O_1$; °लम्बते $VA_1$ **3 निश्चयाः** ] $MK_1$; विकल्पः V; निश्चयः $A_1O_1$ **9 स्याद् यः** ] $MVA_1K_1O_1^{pc}$; स्यद्यः $O_1^{ac}$ **10 भ्रम°** ] $MVA_1O_1$; प्रभ्रम° $K_1$ **10 प्रवृत्तिः** ] $MVK_1O_1$; प्रवृत्ति $A_1$

था रूपसाधर्म्यसमारोपितरजताकारनिवारणाय शुक्तौ प्रमाणान्तरं प्रवर्तते “नेदं रजतम्” इति, तथेहापि शाबलेयादिस्वलक्षणे निर्विकल्पेन सर्वात्मना परिच्छिन्ने कुतश्चिन्निमित्तादारोपितमगोरूपमेव व्यवच्छिन्दन्ति विकल्पाः “अगौर्न भवति” इति। न तु गोस्वलक्षणग्रहणे तेषां व्यापारः, तस्य प्रागेव गृहीतत्वात्।

## [6.5 विकल्पान्तरानर्थक्यम्]

ब्रूयात्। नानाविशेषणनिकरकल्माषितवपुषस् तस्यार्थस्य किंचिद्विशेषणं प्रागगृहीतं विकल्पैर्गृह्येतेति। तदप्ययुक्तम्, नानाविशेषणरू-

---

मनिमित्तेति। तदुक्तम्—नो चेद् भ्रान्तिनिमित्तेन संयोज्येत गुणान्तरम्। शुक्तौ वा रजताकारो रूपसाधर्म्यदर्शनात्॥ (*Pramāṇavārttika* I 44) इति।

**4 व्यवच्छिन्दन्ति** ] Cf. *Pramāṇasamuccaya* V 12 (Pind [2009:A5.21–22]): बहुधाप्यभिधेयस्य न शब्दात्सर्वथा गतिः। स्वसंबन्धानुरूप्यात्तु व्यवच्छेदार्थकार्यसौ॥

**7 ब्रूयात्** ] Cf. *Ślokavārttika apoha* 125: निर्भागो ऽपि हि वस्त्वात्मा शब्दैर्भागेन गम्यते। न हि सच्छब्दविज्ञानाद् घटाद्यर्थः प्रतीयते॥

**7 नानाविशेषणनिकर॰** ] *Nyāyamañjarīgranthibhaṅga* 131.11: नानाविशेषणनिकरेति नानाभूतानि विशेषणानि गोत्वशाबलेयत्वद्रव्यत्वादीनि।

---

**1 यथा** ] MVK$_1$; यथार्थ॰ M$^{gha}$A$_1$O$_1$ **1 शुक्तौ** ] MVK$_1$O$_1$; मुक्तौ A$_1$ **3 निर्विकल्पेन** ] MK$_1$; निर्विकल्पेनापि M$^{gha}$; निर्विकल्पकेन VA$_1$O$_1$ **3 परिच्छिन्ने** ] MVK$_1$; परिच्छिन्नं A$_1$O$_1$ **3 ॰रूपमेव** ] M$^{gha}$A$_1$K$_1$O$_1$; ॰रूपमिव MV **4 व्यवच्छिन्दन्ति** ] M$^{en}$VA$_1$K$_1$O$_1$; व्यवच्छिंतिदं M **4 अगौर्न** ] MVK$_1$; गगौर्न A$_1$O$_1$ **5 गोस्वलक्षण॰** ] M$^{gha}$A$_1$K$_1$O$_1$; गोः स्वलक्षण॰ MV **5 ग्रहणे** ] MVK$_1$O$_1$; ग्रहणं A$_1$ **5 तस्य** ] K$_1$; om. MVA$_1$O$_1$ **5 गृहीत॰** ] MVK$_1$; स्वलक्षणगृहीत॰ A$_1$O$_1$ **7 ब्रूयात्** ] A$_1$K$_1$O$_1$; अथ ब्रूयात् MV **7 ॰विशेषण॰** ] K$_1$; MVA$_1$O$_1$ **7 ॰कल्माषित॰** ] MVK$_1$; ॰कल्पापित॰ A$_1$O$_1$ **8 प्रागगृहीतं** ] MK$_1$O$_1$; गृहीतं V; प्रागृहीतं A$_1$ **8 ॰ह्येतेति** ] K$_1$; ॰ह्यत इति MV; ॰ह्यतेति A$_1$O$_1$ **8 नाना॰** ] MA$_1$K$_1$O$_1$; om. V **8 ॰विशेषण॰** ] K$_1$; ॰विशेषणनिकर॰ MV; ॰विशेषणा॰ A$_1$O$_1$

षितस्यापि वस्तुनस् तद्विशेषणोपकारशक्तिव्यतिरिक्तात्मनो ऽनुपलम्भात्। तदभेदे सति तद्विशेषणोपकार्यवस्तुस्वरूपग्रहणवेलायामेव तत्खचितग्रहणसिद्धेर्विकल्पान्तराणामानर्थक्यमेव। तदुक्तम्—

यस्यापि नानोपाधेर्धीग्रीहिकार्थस्य भेदिनः।

तस्यापि

नानोपाध्युपकाराङ्गशक्त्यभिन्नात्मनो ग्रहे।
सर्वात्मनोपकार्यस्य को भेदः स्यादनिश्चितः॥ इति।

तस्मादपोहविषया विकल्पाः शब्दाश्चेति।

---

**1** तद्विशेषणो° ··· ऽनुपलम्भात् ] *Nyāyamañjarīgranthibhaṅga* 131.12: तद्विशेषणोपकारशक्तिव्यतिरिक्तात्मनो ऽनुपलम्भादिति।
**1** तद्विशेषणोपकार° ] Cf. *Pramāṇasamuccaya* V 6cd–7ab (Pind [2009:A3.20–27]): सामान्यादिबहुत्वे च युगपद्ग्राहकेषु च। उपकारो विरुध्येत, सर्वैर्वा मेचकेक्षणम्॥
**2** तद्विशेषणो° ] *Nyāyamañjarīgranthibhaṅga* 131.17–18: अथैकाऽभिन्ना चेति पक्षस्तदपेक्षयेदमुक्तम्—तद्विशेषणेति।; 131.24–132.2: अस्मिंश्च व्याख्याने तद्विशेषणोपकार्यवस्तुस्वरूपग्रहणवेलायामेवेत्यत्र तानि विशेषणान्युपकार्याणि यस्य वस्तुनस्तद्विशेषणोपकार्यमिति विग्रहः कर्तव्यः।
**4** यस्यापि ··· °र्थस्य ] *Pramāṇavārttika* I 52ab (Gnoli ed.); *Nyāyamañjarīgranthibhaṅga* 131.18: यस्यापि नानोपाधेरिति।
**5** तस्यापि ] *Pramāṇavārttikasvavṛtti* 29.9
**6** नानोपाध्यु° ··· °निश्चितः ] *Pramāṇavārttika* I 52cd–53ab (Gnoli ed.)

---

**1** °क्तात्मनो ऽनु° ] $MVK_1$; °क्तात्मनानु° $A_1O_1$ **3** तत्खचितग्रहण° ] $MA_1O_1$; तत्त्वात्तच्चित्रग्रहणा° V; तत्खचित्रग्रहण° $K_1$ **3** °र्विकल्पा° ] MV; °र्निकल्पा° $A_1O_1$ **4** नानोपाधेर्धीग्रीहिकार्थस्य ] $MA_1K_1O_1$; नानोपाधिर्निर्वाहिका ऽर्थस्य V **5** तस्यापि ] $M^{ka}M^{kha}M^{gha}VA_1K_1O_1$; तस्यापि नानोपाध्यात्तशक्तिर्न ह्यतिरिच्यते M **6** नानोपाध्यु° ] $MVA_1O_1$; नो° $K_1$(metrical if counted with तस्यापि) **8** °या विकल्पाः शब्दाश्चेति ] $K_1$; °याः शब्दा विकल्पाश्चेति $MVA_1O_1$